# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य-**1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** शुक्लयजुर्वेदः | **प्रश्नपत्रम् - 2 - CC - 4.1.1** | **समयः- 8 तः 11** |
| **दिनाङ्कः- 10/10/2019** | **संदर्भग्रन्थः –** शुक्लयजुर्वेदमाध्यन्दिनसंहिता (11-14 अ.) | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 अधोलिखितयोः एकस्य समाधानं विधीयताम् । 05**

1. माध्यन्दिनसंहितायाः एकादशतमाध्यायस्य श्रौतयागीयान् विषयान् उपस्थापयत ।
2. माध्यन्दिनसंहितायाः एकादशाध्यायगतान् विशेष पारिभाषिकशब्दान् महीध्रदमाष्यमाश्रित्य विवेचयत ।

**प्र-2 अधस्तनयोः एकः मन्त्रः पठितभाष्यमनुसृत्य व्याख्यायताम् । 10**

1. युक्तेन मनसावयं देवस्य सवितुः सवे स्वर्ग्याय शक्त्या ।
2. परित्वाग्ने पुरं वयं विप्र  सहस्य धीमहि ।
   घृषद्वर्णं दिवे दिवे हन्तारं भङ्गुरावताम् ।।

**( द्वितीयान्वितिः -  युनिट-2 )**

**प्र-3 अधोलिखितयोः एकस्य समाधानं विधीयताम् । 05**

1. सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया ।
   विश्वप्स्न्या विश्वतस्परि ।।
2. समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ।
   अस्मिन्हव्या जुहोतन ।।

**प्र-4 अधस्तनयोः एकः मन्त्रः पठितभाष्यमनुसृत्य व्याख्यायताम् । 10**

1. माध्यन्दिनसंहितायाः द्वादशाध्यायमाश्रित्य उरवाधारणविषयमुपस्थापयत ।
2. माध्यन्दिनसंहितायाः द्वादशाध्यायमाश्रित्य देवातानां विषये यथाज्ञानं लिखत ।

**( तृतीयान्वितिः -  युनिट-3 )**

**प्र-5 अधोलिखितयोः एकस्य समाधानं विधीयताम् । 05**

1. याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
   बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व  हसः ।।
2. नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
   ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ।।

**प्र-6 अधस्तनयोः एकः मन्त्रः पठितभाष्यमनुसृत्य व्याख्यायताम् । 10**

1. त्रयोदशाध्यायानुसारं (माध्यन्दिनसंहितायाः ) सर्पाणां विषये यथाज्ञानं लिखत ।
2. माध्यन्दिनसंहितायाः त्रोयदशाध्यायस्य सम्पूर्णं विषयवस्तु उपस्थापयत । (संक्षेपेण)

**प्र-7 ससन्दर्भं विवेचनं विधीयताम्।** **10**

1. मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः।
   माध्वीर्नः सन्त्वोषधीः ।।
2. इन्द्राग्नी अव्यथमानामिष्टकां दृं हतं युवम्।
   पृष्ठेन द्यावापृथिवी अन्तरिक्षं च विबाधसे ।।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य सविस्तरमुत्तरं लिखत।** **05**

1. अग्निचयने कियत्यश्चितयः काश्च ताः, कुत्र कुत्र च माध्यन्दिनसंहितायाः निर्दिष्टाः सन्तीति वर्णयत।
2. माध्यन्दिनसंहितायाः चतुर्दशाध्यायस्य विषयसारांशमुपवर्णयत।

**प्र-9 दशानां लघूत्तराणि लिखत।** **10**

1. प्रथमायाश्चितेः कोऽस्ति द्रष्टा
2. ब्रह्मशब्देन केषां ग्रहणं भवति
3. वाजपतिः - इत्यस्य कोऽर्थः
4. अकूतिः - इत्यस्य कोऽर्थः
5. समनसा - इत्यस्य कोऽर्थः
6. नृमणा - इत्यस्य कोऽर्थः
7. सुम्नया - इत्यस्य कोऽर्थः
8. सहस्व - इत्यस्य कोऽर्थः
9. यविष्ठः - इत्यस्य कोऽर्थः
10. पीपिही - इत्यस्य कोऽर्थः
11. पुरीष्यासः - इत्यस्यार्थः कः
12. पावकः - इत्यस्यार्थः कः
13. रुक्मः - इत्यस्यार्थः कः
14. जातवेदः- इत्यस्यार्थः कः
15. प्रसूवरी - इत्यस्यार्थः कः

****************